CAREERINDIA

# PART–IV

## LANGUAGE–I

## SANSKRIT

| |
|---|
| अभ्यर्थिनः **चतुर्थभागस्य (Part-IV)** प्रश्नानाम् **( प्र.सं. 91-120 )** उत्तरं दद्युः, यदि तैः **संस्कृतं प्रथमभाषा**रूपेण **(Language-I)** चितम्। |

**अधोलिखितं गद्यांशं पठित्वा प्रश्नानां (91 - 99) विकल्पात्मकोत्तरेभ्यः उचिततमं उत्तरं चिनुत।**

परेषामुपकारः परोपकारः कथ्यते। यः मानवः स्वार्थं विना परेषामुपकारं करोति, सः परोपकारीति कथ्यते। तस्य तच्चकार्यं परोपकार इति नाम्ना कथ्यते। अयं गुणः सर्वजनेषु न दृश्यते। परन्तु ये स्वजीवने उन्नतिं कर्तुमिच्छन्ति, ते परोपकारतुल्य–गुणानवलम्ब्य एव उन्नतिं कुर्वन्ति इति केषाञ्चित् मतम्।

अत एव केचित् पुरुषाः परोपकाराय एव कूपं खानयन्ति उद्यानम् आरोपयन्ति धर्मशालां पाठशालां च निर्मापयन्ति। ते सर्वजनहिते रताः भवन्ति। न केवलं चेतनाः अपितु अचेतनाः अपि परोपकाराय यतन्ते। मेघाः परोपकारायैव स्वजलं वर्षन्ति, नद्यः परोपकारायैव वहन्ति। वृक्षाः परोपकारायैव फलन्ति। यथोक्तम् –

परोपकारेणैव मानवेषु समाजसेवायाः, देशसेवायाः दीनोद्धरण–भावनादिसद्गुणानां विकासो भवति। अस्मिन् जगति ये पुरुषाः परोपकार–परायाः भवन्ति, ते स्वधनं, पुत्रान्, दारान्, स्वशरीरमपि लीलयैव प्रददति। ते परार्थमेव सर्वदा चिन्तयन्ति साधयन्ति च; परन्तु स्वार्थं कदापि न समीहन्ते। यथा कालिदासेनोक्तम् –

**'परहितनिरतानामादरो नात्मकार्ये'**

महाराजशिविः स्वमांसं निकृन्त्य श्येनाय, परोपकरायैव प्रादात्। महर्षिः दधीचिः देवानां हिताय स्वीयानि अस्थीनि सुप्रसन्नः इन्द्राय ददौ। महर्षिः दयानन्दः, महात्मा गान्धी, नेहरूमहोदयः इत्यादयः महापुरुषाः स्वदेशस्य सम्मानादिरक्षणार्थम् अत्यधिकं यतवन्तः। तेषु अधिकाः स्वप्राणानपि समर्पितवन्तः।

एतद्विपरीतं संसारे केचन पुरुषाः स्वार्थाय परान् निघ्नन्ति। ते मनुष्यरूपेण राक्षसाः इव भुवस्तले। परन्तु ये निरर्थकं परार्थं विनाशयन्ति, ते असुरेभ्यः अपि हीनतराः।

अतः अस्माभिः सर्वदा परोपकारपरायणैः भवितव्यम्। यथोक्तम् –

**''धनानि जीवितं चैव परार्थे प्राज्ञ उत्सृजेत्।**
**सन्निमित्ते वरं त्यागो विनाशे नियते सति।।''**

**91.** निकृन्त्य – इत्यस्मिन् पदे कः प्रत्ययः वर्तते ?
(1) यत् (2) ल्यप् (3) तव्यत् (4) ण्यत्

**92.** के जनाः सर्वजनहिते रताः भवन्ति ?
(1) ऋषयः (2) कृषकाः (3) अध्यापकाः (4) परोपकारिणः

**93.** 'उन्नतिः' – इत्यस्मिन् पदे कः प्रत्ययः वर्तते ?
(1) अच् (2) मतुप् (3) तरप् (4) क्तिन्

**94.** देवानां हिताय कः स्वीयानि अस्थीनि ददौ ?
(1) देवराजः इन्द्रः (2) महर्षि दधीचिः (3) ऋषिः कण्वः (4) वाल्मीकिः

**95.** केचित् पुरुषाः परोपकाराय कस्य निर्माणं न कुर्वन्ति ?
(1) कारागारः (2) धर्मशालाः (3) पाठशाला (4) कूपाः

**96.** परोपकारेण जनेषु कस्य गुणस्य विकासो न भवति ?
(1) क्रोधस्य (2) देशसेवायाः (3) दीनोद्धरणम् (4) समाजसेवायाः

www.careerindia.com

CAREERINDIA

**97.** कः गुणः सर्वजनेषु न दृश्यते ?
(1) परोपकारः (2) सौम्यता (3) विश्रम्भः (4) सौन्दर्यम्

**98.** संसारे केचन पुरुषाः __________ परान् निघ्नन्ति। अत्र उपयुक्तपदेन रिक्तस्थानं पूरयत।
(1) परसेवायै (2) जनकल्याणाय (3) आनन्दाय (4) स्वार्थाय

**99.** मेघाः परोपकारायैव __________ वर्षन्ति। अत्र रिक्तस्थानं पूरयत।
(1) सिकताः (2) जन्तून् (3) स्वजलम् (4) तडितम्

**अधोलिखितान् पद्यान् पठित्वा प्रश्नानां (100 - 105) विकल्पात्मकोत्तरेभ्यः उचिततमं उत्तरं चिनुत।**

उद्योगे नास्ति दारिद्र्यं, जपतो नास्ति पातकम्।
मौनेन कलहो नास्ति, नास्ति जागरिते भयम्।।
**किं कुलेन विशालेन विद्याहीनस्य देहिनः।**
**अकुलीनोऽपि विद्यावान्देवैरपि स पूज्यते।।**
परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम्।
वर्जयेत् तादृश्यं मित्रं विषकुम्भं पयोमुखम्।।
**यस्मिन् देशे न सम्मानो न वृत्तिर्न च बान्धवाः।**
**न च विद्यागमोऽप्यस्ति न तत्र दिवसं वसेत्।।**
आपत्काले तु सम्प्राप्ते, यन्मित्रं मित्रमेव तत्।
वृद्धिकाले तु संप्राप्ते, दुर्जनोऽपि सुहृद् भवेत्।।

**100.** पद्यानुसारं उद्योगे किं न वर्तते ?
(1) सफलता (2) दारिद्र्यम् (3) शान्तिः (4) निद्रा

**101.** वञ्चकमित्रस्य तुलना केन सह कृता ?
(1) लोमशः (2) पयोमुखं विषकुम्भम् (3) चौरः (4) स्थगः

**102.** वृद्धिकाले सम्प्राप्ते कः सुहृद् भवति ?
(1) अध्यापकः (2) बान्धवः (3) प्रतिवेशी (4) दुर्जनः

**103.** 'विद्यागमोऽप्यस्ति' इत्यस्य पदस्य समुचित – सन्धिविच्छेदः कुरुत।
(1) विद्याग + मोऽप्यस्ति (2) विद्या + गमोऽप्यस्ति
(3) विद्या + आगमः + अपि + अस्ति (4) विद्यागम + अप्यस्ति

**104.** अकुलीनोऽपि कः जनः देवैः पूज्यते ?
(1) शासकः (2) विद्यावान् (3) चिकित्सकः (4) मन्त्री

**105.** अधोलिखितेषु किं पदं सप्तमीविभक्यन्तं न अस्ति ?
(1) विशालेन (2) परोक्षे (3) वृद्धिकाले (4) सम्प्राप्ते

**106.** मानवभाषायाः अधोलिखितेषु कया विशेषतया, मानवाः तेषां वस्तूनां विषयेऽपि वक्तुं शक्नुवन्ति याः तात्कालिकसमये स्थाने च न वर्तन्ते ?
(1) विस्थापनम् (Displacement)
(2) यादृच्छिकता (Arbitrariness)
(3) संरचनात्मक–स्वतन्त्रता (Structural Independence)
(4) विवेकशीलता (Discretness)

www.careerindia.com

CAREERINDIA

**107.** अधोलिखितेषु किं क्रेशनस्य (Krashen's) परिकल्पनायां व्यागौत्स्कीमहोदयस्य ZDP इत्यस्यां समानं वर्तते ?

(1) निविष्ट-परिकल्पना (Input Hypothesis)

(2) अनुवीक्षण-परिकल्पना (Monitor Hypothesis)

(3) नैसर्गिकव्यवस्था-परिकल्पना (Natural Order Hypothesis)

(4) प्रभावशालि-फिल्टर-परिकल्पना (Affective Filter Hypothesis)

**108.** फलप्रदशब्दावलि: (Productive Vocabulary) किं भवति ?

(1) ते शब्दा: ये तथैव ज्ञायन्ते यथा ते श्रुता:

(2) शब्दा: स्पष्टा: (Noticed) भवन्ति यदा वयं पंक्तिभ्य: पर: पठाम:

(3) शब्दा: येषां प्रयोग: वयं लेखने सम्भाषणे च कुर्म:

(4) शब्दा: ये पाठकाय नवीना: सन्ति

**109.** द्वितीय भाषाध्यापने अधोलिखितेषु किं व्याकरणानुवादविधि: न अस्ति ?

(1) प्रथमद्वितीयभाषयो: व्याकरणनियमानां तुलना

(2) द्वितीयभाषाया: व्याकरणनियमानां अधिगम: (Learning)

(3) द्वितीयभाषया प्रत्यक्षसम्प्रेषणं, तदनन्तरं द्वयो: भाषयो: व्याकरणनियमानां तुलना

(4) भाषाया: कार्यात् (Function) तस्या: स्वरूपे (from) अधिकतरं केन्द्रीकरणं (focus)

**110.** एका अध्यापिका स्वछात्रान् चिन्तयितुं निर्दिशति यत् तथा दत्तस्य एकस्य अनुभवाधारितप्रश्नस्य उत्तरं तै: कथं लिखितं, अपि च उत्तरलेखनसमये ते किं कथं च चिन्तयन्ति स्म। एतत् कस्य उदाहरणं अस्ति ?

(1) अधिसंज्ञानम् (Metacognition)

(2) रूपक: (Metaphor)

(3) अधिभाषिकतावाद: (Metalingualism)

(4) अधिसंकेतात्मकता (Metasemiotics)

**111.** एकस्मिन् भाषासमुदाये, एतत् दृष्टं यत् वक्तृणां द्वयो: विभिन्न-सामाजिक-आर्थिक-वर्गयो: 'S' इत्यस्य वर्णस्य उच्चारणं भिन्नरूपेण क्रियते, एतत् कस्य उदाहरणम् अस्ति –

(1) सामाजिक-भाषिक परिवर्ती (Variable)

(2) एक: व्यावहारिकपरिवर्ती (Pragmatic Variable)

(3) एक: सामाजिकसांस्कृतिकपरिवर्ती (Variable)

(4) एक: सामाजिक-मनोवैज्ञानिकपरिवर्ती (Variable)

**112.** मातृभाषाधारितबहुभाषिकतावाद: समर्थनं करोति यत् __________

(1) सर्वे बालका: मातृभाषायां द्वितीयभाषायां वा तेषां विद्यालयीयशिक्षां आरभन्ते

(2) सर्वे बालका: राज्यभाषायां तेषां विद्यालयीयशिक्षां आरभन्ते

(3) सर्वे बालका: आंग्लभाषामाध्यमेन, गृहभाषायां च विद्यालयीयशिक्षां आरभन्ते

(4) सर्वे बालका: हिन्दीभाषां प्रथमभाषारूपेण पठन्ति

**113.** अधोलिखितेषु किं कथनं भाषाग्रहणयन्त्रस्य (LAD) विचारेण न व्याख्यातम् ?

(1) बाला: केन प्रकारेण तेषां प्रथमभाषां शिक्षन्ते

(2) बाला कथं चतुर्पञ्चवर्षस्य अल्पावधौ एव भाषाधिगमे समर्था: भवन्ति

(3) बाला: कथं प्रतीकात्मकभाषां शिक्षन्ते

(4) किं कारणं यत् बालकानां भाषिक निर्गम: (Output) तै: प्राप्तनिवेशात् (Input) अधिकतरं वर्तते।

www.careerindia.com

CAREERINDIA

**114.** भाषा-उपभाषाविषये अधोलिखितेषु किं भाषिकतादृष्ट्या समीचीनं वर्तते ?

(1) भाषाणां लिखितसाहित्यं वर्तते किन्तु उपभाषाः मौखिकपरम्परायामेव आधारिताः भवन्ति

(2) भाषाः उपभाषाः च भाषिकता दृष्ट्या भिन्नाः भवन्ति परन्तु भौगोलिकरूपेण समानाः सन्ति

(3) भाषाणां लिपिः भवति किन्तु उपभाषाणां च लिपिः न वर्तते

(4) भाषा-उपभाषा-मध्ये काऽपि स्पष्टभिन्नता न अस्ति

**115.** कमिनस्य (Cummin's) अन्योन्याश्रयपरिकल्पनानुसारं (Interdepedence Hypothesis) अधोलिखितेषु किं अन्योन्याश्रितः वर्तते –

(1) द्वितीयभाषायाः अवबोधः परिणामः (Production) च

(2) प्रथमभाषायां द्वितीयभाषायां च संज्ञानात्मक-शैक्षणिक-प्रावीण्यम् (Cognitive academic proficiency)

(3) द्वितीयभाषायां पठनं लेखनं च

(4) प्रथमभाषायां द्वितीयभाषायां च मूलभूत-अन्तर्वैयक्तिक-कौशलम्

**116.** वर्णानां वर्णमालायाः स्थाने शब्दानां लघुकथापाठस्य च कौशलप्राप्तिः अधोलिखितेषु केन कथनेन न समर्थ्यते ?

(1) प्राथमिकपाठकाः बृहदेककेषु (Bigger Units) लघुएककतुलनायां (Small units) श्रेष्ठरूपेण संकेन्द्रिताः भवितुं शक्नुवन्ति।

(2) शब्दाः पाठाः च सार्थकसंयोगान् चरयन्ति यं वर्णाः कर्तुं न शक्नुवन्ति

(3) शब्दाः पाठाः च अधिकतराः रुचिकराः भवन्ति किन्तु वर्णाः न सन्ति

(4) पृथक्वर्णान् कण्ठस्थीकर्तुं शब्दानां तुलनायां अधिकं कठिनं भवन्ति

**117.** अधोलिखितेषु कौशलेषु किं सावबोध-पठनस्य सूचकः (Mark) न मन्यते ?

(1) प्रत्येकवर्णे/वर्णमालायां च एकाग्रता (Focus)

(2) आगामिविषयवस्तुनः पूर्वानुमानम्

(3) विचाराणां घटनाक्रमस्य च व्यवस्था (Organizing) आकलनं च

(4) अधुनापर्यन्तपठितपाठस्य मानसिकसंक्षेपणम्

**118.** वीरा एका सप्तमासीया शिशुः अस्ति। सा अधुना स्वरव्यञ्जनयुक्तोच्चारणं करोति। सा अधोलिखितेषु कस्य प्रयोगेन सम्प्रेषणं करोति ?

(1) स्वनिम (Phoneme)  (2) त्रुटितवाक् (Babbling)

(3) अव्यक्तवाक् (Cooing)  (4) भाषिकवाक् (Linguistic Speech)

**119.** पाठावबोधस्य पद्धतिविषये, अधोलिखितेषु अशुद्धं कथनं चिनुत।

(1) द्रुतपठनं पाठस्य द्रुतगत्या पठनं अस्ति यावत् क्रमवीक्षणं (Scanning) विशिष्टतथ्यानां अन्वेषणं वर्तते

(2) द्रुतपठनं (Skimming) अधिकतया गहनपठनविषये वर्तते क्रमवीक्षणं च शीघ्रतया (Cursory) पठनं भवति

(3) द्रुतपठनं पुनर्विचारार्थं (Reviewing) उपयुक्तं भवति क्रमवीक्षणं च विशेषप्रश्नानां उत्तराणि दातुं सहायकं भवति

(4) द्रुतपठनं क्रमवीक्षणं च द्वे एव पठनसमये तीव्रअक्षिगतिं अपेक्षेते

**120.** यदा बालाः तेषां परिवेशे दृश्यमानानां वस्तु-घटना-तथ्यानां विषये प्रष्टुं भाषां प्रयोक्तुं आरभन्ते, भाषायाः किं क्रिया अन्येभ्यः अधिकतरं प्रयोज्यते ?

(1) कल्पनात्मकः (Imaginative)  (2) नियमनात्मकः (Regulatory)

(3) सूचनात्मकः (Informative)  (4) स्वतः शोधात्मकः (Heuristic)



www.careerindia.com

CAREERINDIA

# PART–V

## LANGUAGE–II

## SANSKRIT

| |
|---|
| अभ्यर्थिनः **पञ्चमभागस्य (Part-V)** प्रश्नानाम् **( प्र.सं. 121-150 )** उत्तरं दद्युः, यदि तैः **संस्कृतं द्वितीयभाषा (Language-II)** रूपेण चितम्। |

**अधोलिखितं गद्यांशं पठित्वा प्रश्नानां (121-128) विकल्पात्मकोत्तरेभ्यः उचिततमं उत्तरं चिनुत।**

एकस्मिन् ग्रामे सत्यप्रियः नामकः एकः काष्ठिकः वसति स्म। सः प्रत्यहं वनं गत्वा कुठारेण काष्ठानि छिन्दति स्म। काष्ठानि छित्त्वा तानि काष्ठानि नगरे विक्रीय सः स्वजीविकोपार्जनं करोति स्म। एवं सः सुखेन जीवनं नयति स्म।

वने वृक्षाणां समीपे एव एका नदी प्रवहति स्म। एकस्मिन् दिने यदा सत्यप्रियः कुठारेण काष्ठानि छिन्दति स्म, तस्य हस्तात् भ्रष्टः कुठारः जले अपतत्। कुठारेण बिना सः काष्ठानि छेत्तुम् असमर्थः अभवत्। एवं सः उच्चैः विलापं कर्तुमारभत। तस्य क्रन्दनं श्रुत्वा वरुणदेवः नद्याः बहिर् आगत्य तमपृच्छत्–''भद्र! कस्मात् रोदिषि?''

ततः सत्यप्रियः सर्वं वृत्तान्तं तस्मै निवेदितवान्। वरुणदेवः तस्य परीक्षां कर्तुम् ऐच्छत। अतः सः जले निमज्जितवान्। शीघ्रमेव हस्ते सुवर्णकुठारम् आनीय सः बहिरागच्छत् सत्यप्रियम् अपृच्छत् च – ''किमेषः तव कुठारः? गृह्यतम्।''

सः पुनः उच्चैः रोदितुमारभत अवदत् च – ''नास्ति एषः मम। अहन्तु स्वकीयमेव कुठारम् इच्छामि।''

ततः वरुणदेवः पुनः जले निमज्जितवान्। अधुना सः रजतकुठारेण साकं बहिरागच्छत्। तं प्रदर्श्य सः पूर्ववत् अपृच्छत् – ''अयमस्ति तव कुठारः, गृह्यताम।''

किन्तु सत्यप्रियः सत्यवादी आसीत्। सः शीघ्रमवदत् – ''अयमपि मम कुठारः नास्ति।'' एतदाकर्ण्य पुनरपि वरुणदेवः जले निमज्जितः। अधुना सः लौहकुठारेण सह बहिर् आगत्य तं काष्ठिकमपृच्छत् – ''किमेषः तव कुठारः?''

हर्षितः सत्यप्रियः झटिति उवाच – ''आम्, आम्। अयमेवास्ति मम कुठारः प्रभो।'' वरुणदेवस्य चरणौ स्पृष्ट्वा, स्वकुठारं गृहीत्वा च सः काष्ठानि छेत्तुम् अचलत्। तस्य सत्यनिष्ठां दृष्ट्वा वरुणदेवः अतीव प्रसन्नोऽभवत् अतस्तेन देवेन त्रयः एव कुठाराः तस्मै काष्ठिकाय प्रदत्ता। एवमुचितं कथ्यते –

सत्यमेव जयते।

**121.** सत्यप्रियः नामकः काष्ठिकः कीदृशः व्यक्तिः आसीत्?

(1) सत्यवादी (2) दुष्टः (3) लोभी (4) कृपणः

**122.** 'नास्ति एषः मम।' इति कः कम् कथयति?

(1) कुठारः वरुणदेवम्
(2) वरुणदेवः काष्ठिकम्
(3) काष्ठिकः वरुणदेवम्
(4) काष्ठिकः कुमारम्

**123.** वरुणदेवः सर्वप्रथमं कीदृशं कुठारं आनीय आगच्छत्?

(1) लौहकुठारम् (2) ताम्रकुठारम् (3) सुवर्णकुठारम् (4) कांस्यकुठारम्

www.careerindia.com

CAREERINDIA

**131.** समुद्रतटं जनाः किमर्थं आगच्छन्ति ?

(1) अध्ययनाय (2) व्यापाराय (3) पर्यटनाय (4) तपश्चर्यायै

**132.** समुद्रतटेषु के स्वजीविकां चालयन्ति ?

(1) नाविकाः (2) मत्स्यजीविनः (3) साधवः (4) व्यापारिगणः

**133.** अधोलिखितयोः तालिकयोः सम्यक् सम्मेलनं कुरुत।

| (क) | | (ख) | |
|---|---|---|---|
| (a) | मुम्बईनगरम् | (i) | वैदेशिकव्यापारः |
| (b) | विशाखापत्तनम् | (ii) | मेरीनातटः |
| (c) | चेन्नईनगरम् | (iii) | नारिकेलफलानि |
| (d) | कोच्चितटः | (iv) | जुहूतटः |

(1) (a)-(i), (b)-(ii), (c)-(iii), (d)-(iv) (2) (a)-(ii), (b)-(iv), (c)-(i), (d)-(iii)

(3) (a)-(iii), (b)-(i), (c)-(iv), (d)-(ii) (4) (a)-(iv), (b)-(i), (c)-(ii), (d)-(iii)

**134.** 'दीर्घतमः' – इत्यस्मिन् पदे कः प्रत्ययः प्रयुक्तः ?

(1) तमप् (2) तरप् (3) मतुप् (4) तुमुन्

**135.** भारतस्य दक्षिणदिशायां कः सागरः अस्ति ?

(1) अरबसागरः (2) हिन्दमहासागरः (3) प्रशान्तमहासागरः (4) लालसागरः

**136.** अधोलिखितेषु किं सम्प्रेषणात्मक-उपागमस्य (Communicative Approach) एका विशेषता न वर्तते ?

(1) कार्यात् अधिकतरं स्वरूपे केन्द्रीकरणम्

(2) भाषायाः प्रकरणात्मकप्रयोगः

(3) अध्यापनस्पष्टतास्थाने व्याकरणनियमानां परिज्ञानम्

(4) सम्प्रेषणात्मकक्षमतायाः विकासः

**137.** p इति वर्णस्य b इति, अथवा 6 इति संख्यायाः 9 इति लेखनं पठनं वा एका सामान्यत्रुटिः अस्ति या केन समस्याग्रस्तबालेषु प्राप्यते ?

(1) स्टटरिंग (Stuttering) (2) अफेज़िया (Aphasia)

(3) एनोमिया (Anomia) (4) डिस्लेक्सिया (Dyslexia)

www.careerindia.com

CAREERINDIA

**138.** अधोलिखितेषु किं रचनात्मकाकलनस्य उदाहरणं न अस्ति ?

(1) सम्पूर्णसत्रे मौखिक-लिखित-परीक्षाणां क्रमेण आयोजनं, भूमिकानिर्वहणं इत्यादि:

(2) सत्रान्ते एका सत्रपरीक्षा (Term Test)

(3) व्यापकलिखितपरीक्षाया: काले काले कतिपय-अन्यकार्याणां च संयोजनम् (Combination)

(4) सम्पूर्णसत्रे आद्योपान्तं लघुपरीक्षाभ्य: आरभ्य मित्रपुनरीक्षणपर्यन्तं आकलनपद्धतय:

**139.** आधारभूत-अन्तर्वैयक्तिक-सम्प्रेषणकौशलं कथ्यते :

(1) उच्चतरकोटिभाषाकौशलम्

(2) अमूर्तस्य भाषा (Language of abstraction)

(3) दैनिकसम्प्रेषणाय प्रयुक्तभाषा

(4) अन्तर्भाषा

**140.** अधोलिखितेषु किं मूलपाठावबोधनाय शब्दावलिविकासाय च सहायकं न भवति ?

(1) शब्द-मानचित्राणि (Word-maps)

(2) वर्णमाला-चार्ट (Alphabet-charts)

(3) विषय-मानचित्राणि

(4) चित्र शब्दकोशा:

**141.** अधोलिखितेषु कथनेषु आकलनस्य द्वे-प्रमुखप्रकारविषये किं सत्यम् अस्ति ?

(1) रचनात्मकाकलनं अधिगमात् अधिकतरं स्वरूपे केन्द्रितम् अस्ति

(2) योगात्मकाकलनं (Summative assessment) समग्रशैक्षणिकवर्षे आकलनस्य प्रत्येकस्वरूपस्य समग्रता वर्तते

(3) रचनात्मकाकलनं अधिगमस्य सम्पूर्णावस्थायां निरन्तरं क्रियते

(4) योगात्मकाकलनं अधिगमावस्थाया: पूर्वं पश्चात् च क्रियते

**142.** यदा एक: आरम्भिकपाठक: विशेषपाठ्यविषयवस्तुन: अभिप्रायं ज्ञातुं पाठविषयस्य सांस्कृतिकपक्षाणां च विषये स्वसामान्य-ज्ञानस्य प्रयोग: करोति, एतत् कथ्यते –

(1) उर्ध्व-अधोगामी उपागम: (Approach)

(2) 'टॉप-अप' उपागम:

(3) 'बॉटम-अप' उपागम:

(4) 'बॉटम-डाउन' उपागम:

**143.** एका अध्यापिका हिन्दी भाषिछात्रान् द्वितीया-भाषारूपेण आङ्ग्लभाषां पाठयति। सा स्पष्टनियमानां कथनं विना, तेभ्य: आङ्ग्लभाषायां लघुवार्तालापाय प्रसङ्गान् अवसरान् च ददाति। सा तेषां समक्षं उदाहरणानि उपस्थापयति, येषां प्रयोग: छात्रा: स्ववार्तालापेषु कुर्वन्ति। शनै: शनै: ते अध्यापिकाया: साहाय्येन स्वयमेव नियमान् रचयन्ति। अध्यापिकया क: आदर्श:/उपागम: प्रयुज्यते ?

(1) व्याकरणानुवाद-विधि: (Method)

(2) श्रव्य-भाषिक-विधि: (Audio Lingual)

(3) सम्प्रेषणात्मक-उपागम:

(4) प्रत्यक्ष-विधि:



www.careerindia.com

CAREERINDIA

**144.** अधिगमे अन्तरालं ज्ञातुं त्रुटिसमीक्षणं महत्वपूर्णं भवति, यतो हि –

(1) अधिकतमाः त्रुटयः छात्राणां दोषपूर्ण – प्रवृत्तेः कारणात् भवन्ति

(2) त्रुटयः छात्राणां मस्तिष्कान्तरे प्रवेशार्थं तेषां शिक्षणस्थितेः च ज्ञानार्थं भवन्ति

(3) त्रुटयः छात्राणां अवबोधनप्रक्रमे न्यूनतां दर्शयति

(4) त्रुटयः वैचारिकविकासं प्रेरणां च दर्शयति

**145.** अधोलिखितेषु किं आकलनविषये सत्यं न अस्ति ?

(1) अनेन छात्रस्य प्रगतेः सकलतया अवलोकनं क्रियते

(2) एतत् छात्रस्य प्रदर्शनस्य (Performance) प्रत्यक्षप्रमाणं प्रस्तौति

(3) एतत् छात्रस्य प्रगतेः गतिं आकलयितुं सहायतां करोति

(4) एतत् केवलं अध्यापकेन क्रियते

**146.** अधोलिखितेषु किं समावेशीकक्षायाः रचनायां सहायकं न भवति ?

(1) मित्रसमूहअन्तर्क्रिया प्रतिपुष्टिः–व्यवस्था च

(2) दलकार्याणां प्रदानम् (Team Task)

(3) बहुभाषिकपद्धतेः प्रयोगः/अङ्गीकरणम्

(4) कक्षायां कतिपयछात्राणां अनुवीक्षकरूपेण उपस्थितिः

**147.** अधोलिखितेषु किं बालकानां साहित्यस्य एका वाञ्छनीयविशेषता न अस्ति ?

(1) पशु/जीवपात्राणि (2) स्पष्टनैतिकमूल्यानि

(3) अक्षराणां दीर्घाकारः परिचितशब्दाःच (4) आकर्षकचित्राणि

**148.** अधोलिखितेषु किं अधिगमस्य प्रमुखक्षेत्ररूपेण न मन्यते ?

(1) संज्ञानात्मकम् (Cognitive) (2) सामाजिक–सांस्कृतिकम्

(3) प्रभावशाली (4) मनोगत्यात्मकम् (Psychomotor)

**149.** कथानां का श्रेणी बहुभाषिकतावादस्य बहुसंस्कृतिवादस्य च संवर्धनाय सर्वाधिक–उपयुक्ता भवति ?

(1) लोककथाः (2) आत्मकथाः (3) वैज्ञानिककल्पनाकथाः (4) दीर्घकथाः

**150.** स्टीफनक्रेशन महोदयेन अनुवीक्षण–परिकल्पना (Monitor Hypothesis) इति विषये अधोलिखितेषु किं सत्यं न अस्ति ?

(1) इयं द्वितीयभाषाधिग्रहणप्रसंगे प्रयुज्यते

(2) इयं अधिग्रहण–अधिगम–सम्बन्धस्योपरि आधारिता वर्तते

(3) यत् अधिग्रहीतं तत् अधिगमस्य अनुवीक्षणे सहायकं भवति

(4) छात्रः अनुवीक्षणं कर्तुं समर्थः भवेत् यदि तस्य समीपे पर्याप्तसमयः अस्ति, नियमानां पर्याप्तज्ञानं च अस्ति

- o 0 o -

www.careerindia.com

